योगमैश्वरम्" गीता। दिव्यमलौकिकार्थदर्शनसाधनं चक्षुरस्य। ७तथाभूतनेत्रयुक्ते त्रि० "त्वया नियम्या ननु दिव्यचक्षुषा" रघुः "नमस्तुभ्यं विरूपाक्ष ! नमस्ते दिव्यचक्षुषे" नीलकण्ठस्तवः।

**दिव्यतेजस्** स्त्री दिव्यं तेजो यस्याः ५ब०। १ब्राह्मीलतायाम्। २अद्भुततेजस्के त्रि०।

**दिव्यदर्शिन्** त्रि० दिव्यमलौकिकपदार्थं पश्यति दृश–णिनि। अतीन्द्रियार्थदर्शके। "व्याजहार सभामध्ये दिव्यदर्शी महातपाः" भा०आश्र०२०अ०। दृश–क्विप्। दिव्यदृगप्यत्र।

**दिव्यदिन** न० दिवि भवम् यत् कर्म०। दैवे दिने "मासैर्द्वादशभिर्वर्षं दिव्यं तदह उच्यते" सू०सि०तत्मानमुक्तम्।

**दिव्यदोहद** न० "यत् दीयते तु देवेभ्यो मनोराज्यस्य सिद्धये। उपयाचितकं दिव्यदोहदं तद्विदुर्बुधाः" हारा० उक्ते अभीष्टसिद्धये देवेभ्यो देये द्रव्ये।

**दिव्यनदी** स्त्री कर्म०। आकाशगङ्गायाम्।

**दिव्यनारी** स्त्री अप्सरःसु स्वर्वेश्यायाम् दिव्यस्त्री प्रभृतयोऽप्यत्र। "दिव्यस्त्रीकरचारुचामरवरैः संवीज्यमानः कदा" गङ्गास्तवः।

**दिव्यपञ्चामृतम्** न० पञ्चानाममृतानां तत्तुल्यस्वादूनां समाहारः कर्म०। मिलितगव्याज्यदधिक्षीरमधुसिताात्मके पदार्थे राजनि०।

**दिव्यपुष्प** पु० दिव्यं मनोज्ञं पुष्पमस्य। १करवीरे २महाद्रोणायां राजनि० संज्ञायां कन् कापि अतइत्त्वम्। दिव्यपुष्पिका रक्तपुष्पकार्कवृक्षे स्त्री रत्नमाला।

**दिव्यप्रश्न** पु० कर्म०। अनागतज्ञापके प्रश्ने। "उच्चावचं दैवयुक्तं रहस्यं दिव्यप्रश्नाः मृगचक्रा मुहूर्त्ताः। क्षयं महान्तं कुरुसृञ्जयानां निवेदयन्ते पाण्डवानां जयञ्च" भा०उ० ४७अ०।

**दिव्यमान** न० कर्म०। दैवे माने "सुरासुराणामन्योन्यमहोरात्रं विपर्ययात्। यत् प्रोक्तं तद्भवेद्दिव्यं मानो भगणपूरणात्"। "युगानां त्रितयं यातं तथा कृतयुगं त्विदम्। प्रोज्झ्य सृष्टेस्ततः कालं पूर्वोक्तं दिव्यसंख्यया"। "ब्राह्मं दिव्यं तथा पित्र्यं प्राजापत्यं गुरोस्तथा। सौरं च सावनं चान्द्रमार्क्षं मानानि वै नव" सू०सि०।

**दिव्ययमुना** स्त्री नित्यकर्म०। कामरूपपीठस्थदर्शनिकाया नद्याः पूर्वभागस्थे नदीभेदे यथा "तस्या नद्याः पूर्वभागे गङ्गेव फलदायिनी। माघन्तु सकलं मासं तस्यां स्नात्वा नरोत्तमः। तथा दर्शनिकायाञ्च परं निर्वाणमाप्नुयात्। ततः पूर्वे परा देवी नाम्ना सा सरिदुत्तमा। महती दिव्ययमुना यमुनावत्फलप्रदा। दक्षिणाद्रिसमुद्भूता दक्षिणोदधिगामिनी। तस्यान्तु कार्त्तिकं मासं स्नात्वा मोक्षमवाप्नुयात्" कालि०पु०८१अ०

**दिव्यरत्न** न० कर्म०। चिन्तामणौ मणौ शब्दार्थक०।

**दिव्यरथ** पु० कर्म०। व्योमयाने विमाने शब्दरत्ना०।

**दिव्यरस** पु० नित्यकर्म०। १पारदे राजनि०। २मनोज्ञे रसे पु०। दिव्यो रसोऽस्य। ३रुचिररसयुक्ते त्रि०।

**दिव्यलता** स्त्री कर्म०। १मूर्वालतायाम् राजनि०। २मनोज्ञे लतामात्रे च।

**दिव्यवस्त्र** पु० दिव्यं वस्त्रं यस्मात्। १सूर्यप्रकाशे शब्दरत्ना०। ६त०। २भास्वरवस्त्रयुक्ते त्रि०कर्म०। ३मनोज्ञे वसने न०

**दिव्यसरित्** स्त्री कर्म० आकाशगङ्गायाम् "व्योम्नि दिव्यसरिदम्बुपद्धतिः" माघः।

**दिव्यसानु** पु० १विश्वदेवभेदे "विश्वे चाग्निमुखा देवाः" इत्युपक्रमे "पार्ष्णिक्षेमाससमूहश्च दिव्यसानुस्तथैव च" भा०आनु०६१अ०विश्वदेवोक्तौ। २दिव्यसानुके गिरौ च।

**दिव्यसार** पु० दिव्यः सारोऽस्य। शालवृक्षे राजनि०।

**दिव्यादिव्य** पु० दिव्यश्चादिव्यश्च कर्म०। नायकभेदे रसमञ्जरी यथा अर्जुनादयः। २नायिकाभेदे स्त्री यथा द्रौपद्यादयः। ३उपदेवीभेदे स्त्री शब्दार्थचि०।

**दिव्यासन** न० "अथ दिव्यासनं वक्ष्ये पृष्ठं हस्तेन बन्धयेत्। एकहस्तमध्यदेशं भूमिहस्तञ्च नासया" रुद्रया० उक्ते आसनभेदे।

**दिव्येलक** पु० सर्पभेदे "तयाणां वैकरञ्जानां पुनर्दिव्येलकलोध्रपुष्पकराजिचित्रिकाः पोटगलः पुष्पाभिकीर्णो दर्भपुष्पोवेल्लितकः सप्त तेषामाद्ययोराजिलवत् शेषा मण्डलिवत्" सुश्रु०।

**दिव्योदक** न० कर्म०। १अन्तरीक्षभवे जले दिव्यशब्दे भाव० प्र० वाक्ये तद्भेदादि दृश्यम्। अम्बुशब्दे विवृतिः।

**दिव्योपपादुक** पु० उपपद्यते मातृपित्रादिदृष्टकारणमनपेक्ष्यैव अदृष्टसहकृताणुभ्य एव उत्पद्यते उप+पद–उकञ् कर्म० पिशाचादिव्यावृत्तये दिव्य इति विशेषणं तेषाञ्च मातृपित्रादिदृष्टकारणापेक्षाभावेऽपि दिव्यत्वाभावात् तथात्वम्। देवे अमरः।

**दिव्यौघ** पु० तन्त्रोक्ते गुरुभेदे। "महादेवो महाकालस्त्रि-